ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः, ह॒रि॒ः ओं

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठः

# (वाक्य सहित)

# चतुर्थकाण्डे सप्तमः प्रश्नः

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**

**Version 1.0** **January 31, 2021**

## Version Notes:

**This is now the current Version 1.0 dated January 31, 2021.**

1. This replaces the earlier version 0.0 dated August 31, 2019.
2. This version has been updated with the errors found and reported till January 15, 2021.
3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.
4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st August 2018 |
| 2nd | Version Number | 0.0 dated 31st January 2019 |
| 3rd | Version Number | 0.0 dated 31st August 2019 |

# Table of Contents


4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे चतुर्थं काण्डं 4

4.7 चतुर्थकाण्डे सप्तमः प्रश्नः – वसोर्धारादिशिष्ट संस्काराभिधानं ........ 4

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः , हरिः ओं

# 4 कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां पद पाठे चतुर्थं काण्डं

## 4.7 चतुर्थकाण्डे सप्तमः प्रश्नः – वसोर्धारादिशिष्ट संस्काराभिधानं

**TS 4.7.1.1**

अग्नाविष्णू सजोषसेमा वर्द्धन्तु वां गिरः ।

ध्युम्नैर्वाजेभि–रा गतं ॥

वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे

धीतिश्च मे क्रतुश्च मे स्वरश्च मे श्लोकश्च मे

श्रावश्च मे श्रुतिश्च मे ज्योतिश्च मे सुवश्च मे

प्राणश्च मे ऽपान – [ ] 1

**TS 4.7.1.1 - Padam**

अग्नाविष्णू इत्यग्ना – विष्णू । सजोषसेति स – जोषसा । इमाः ।

वर्द्धन्तु । वाम् । गिरः ॥ ध्युम्नैः । वाजेभिः । एति । गतम् ॥ वाजः ।

च । मे । प्रसव इति प्र–सवः । च । मे । प्रयतिरिति प्र–यतिः । च ।

मे । प्रसितिरिति प्र–सितिः । च । मे । धीतिः । च । मे । क्रतुः । च ।

मे । स्वरः । च । मे । श्लोकः । च । मे । श्रावः ।

च । मे । श्रुतिः । च । मे । ज्योतिः । च । मे । सुवः । च । मे ।

प्राण इति प्र – अनः । च । मे । अपान इत्यप – अनः । **1 (50)**

**TS 4.7.1.2**

–श्च मे व्यानश्च मे ऽसुश्च मे चित्तं च म आधीतं च मे वाक्च मे

मनश्च मे चक्षुश्च मे श्रोत्रं च मे दक्षश्च मे बलं च म

ओजश्च मे सहश्च म आयुश्च मे जरा च म आत्मा च मे

तनूश्च मे ( ) शर्म च मे वर्म च मे ऽङ्गानि च मे ऽस्थानि च मे

परूꣳषि च मे शरीराणि च मे ॥ **2**

**TS 4.7.1.2 - Padam**

च । मे । व्यान इति वि–अनः । च । मे । असुः । च । मे । चित्तम् ।
च । मे । आधीतमित्या–धीतम् । च । मे । वाक् । च । मे । मनः ।
च । मे । चक्षुः । च । मे । श्रोत्रम् । च । मे । दक्षः । च । मे ।
बलम् । च । मे । ओजः । च । मे । सहः । च । मे । आयुः । च ।
मे । जरा । च । मे । आत्मा । च । मे । तनूः । च । मे ( ) । शर्म ।
च । मे । वर्म । च । मे । अङ्गानि । च । मे । अस्थानि ।
च । मे । परूꣳषि । च । मे । शरीराणि । च । मे ॥ **2 (68)**

*(अपान – स्तनूश्च मे – ऽष्टादश च) (A1)*

**TS 4.7.2.1**

ज्यैष्ठ्यं च म आधिपत्यं च मे मन्युश्च मे भामश्च मे
ऽमश्च मे ऽम्भश्च मे जेमा च मे महिमा च मे वरिमा च मे
प्रथिमा च मे वर्ष्मा च मे द्राघुया च मे वृद्धं च मे
वृद्धिश्च मे सत्यं च मे श्रद्धा च मे जगच्च – [ ] **3**

**TS 4.7.2.1 - Padam**

ज्यैष्ठ्यम् । च । मे । आधिपत्यमित्याधि–पत्यम् । च । मे । मन्युः ।

च । मे । भामः । च । मे । अमः । च । मे । अंभः । च । मे ।

जेमा । च । मे । महिमा । च । मे । वरिमा । च । मे । प्रथिमा ।

च । मे । वर्ष्मा । च । मे । द्राघुया । च । मे । वृद्धम् । च । मे ।

वृद्धिः । च । मे । सत्यम् । च । मे । श्रद्धेति श्रत् – धा । च । मे ।

जगत् । च । **3 (50)**

**TS 4.7.2.2**

–मे धनं च मे वशश्च मे त्विषिश्च मे क्रीडा च मे

मोदश्च मे जातं च मे जनिष्यमाणं च मे सूक्तं च मे

सुकृतं च मे वित्तं च मे वेद्यं च मे भूतंच मे भविष्यच्च मे

सुगं च मे सुपथं च म ऋद्धं च म ऋद्धि ( ) श्च मे क्लृप्तं च मे

क्लृप्तिश्च मे मतिश्च मे सुमतिश्च मे ॥ **4**

**TS 4.7.2.2 - Padam**

मे । धनम् । च । मे । वशः । च । मे । त्विषिः । च । मे । क्रीडा ।
च । मे । मोदः । च । मे । जातम् । च । मे । जनिष्यमाणम् । च ।
मे । सूक्तमिति सु – उक्तम् । च । मे । सुकृतमिति सु – कृतम् ।
च । मे । वित्तम् । च । मे । वेद्यम् । च । मे । भूतम् । च । मे ।
भविष्यत् । च । मे । सुगमिति सु – गम् । च । मे । सुपथमिति
सु – पथम् । च । मे । ऋद्धम् । च । मे । ऋद्धिः ( ) । च । मे ।
क्लृप्तम् । च । मे । क्लृप्तिः । च । मे । मतिः । च । मे ।
सुमतिरिति सु – मतिः । च । मे ॥ **4 (64)**

*( जगच्च – र्द्धि – श्चतुर्दश च) (A2)*

**TS 4.7.3.1**

शं च मे मयश्च मे प्रियं च मे ऽनुकामश्च मे कामश्च मे
सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे
यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे
क्षेमश्च मे धृतिश्च मे विश्वं च – [ ] **5**

**TS 4.7.3.1 - Padam**

शम् । च । मे । मयः । च । मे । प्रियम् । च । मे । अनुकाम

इत्यनु – कामः । च । मे । कामः । च । मे । सौमनसः । च । मे ।

भद्रम् । च । मे । श्रेयः । च । मे । वस्यः । च । मे । यशः । च ।

मे । भगः । च । मे । द्रविणम् । च । मे । यन्ता । च । मे । धर्ता ।

च । मे । क्षेमः । च । मे । धृतिः । च । मे । विश्वम् । च । **5 (50)**

**TS 4.7.3.2**

मे महश्च मे सँविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे

सीरं च मे लयश्च म ऋतं च मे ऽमृतं च मेऽयक्ष्मं च मे

ऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मे ऽनमित्रं च मे

ऽभयं च मे सुगं च मे शयनं ( ) च मे सूषा च मे सुदिनं च मे ॥ **6**

**TS 4.7.3.2 - Padam**

मे । महः । च । मे । सँविदिति सम्–वित् । च । मे । ज्ञात्रम् । च ।

मे । सूः । च । मे । प्रसूरिति प्र – सूः । च । मे । सीरं । च । मे ।

लयः । च । मे । ऋतम् । च । मे । अमृतम् । च । मे ।

अयक्ष्मम् । च । मे । अनामयत् । च । मे । जीवातुः । च । मे ।

दीर्घायुत्वमिति दीर्घायु – त्वम् । च । मे । अनमित्रम् । च । मे ।
अभयम् । च । मे । सुगमिति सु–गम् । च । मे । शयनम् ( ) । च ।
मे । सूषेति सु – उषा । च । मे । सुदिनमिति सु – दिनम् । च ।
मे ॥ **6 (58)** ***( विश्वं च – शयन – मष्टौ च ) (A3)***

**TS 4.7.4.1**

ऊर्क्च मे सूनृता च मे   पयश्च मे रसश्च मे घृतं च मे मधु च मे
सग्धिश्च मे सपीतिश्च मे कृषिश्च मे वृष्टिश्च मे जैत्रं च म औद्भिद्यं च
मे रयिश्च मे रायश्च मे पुष्टं च मे पुष्टिश्च मे विभु च – [ ] **7**

**TS 4.7.4.1 - Padam**

ऊर्क् । च । मे । सूनृता । च । मे । पयः । च । मे । रसः । च ।
मे । घृतम् । च । मे । मधु । च । मे । सग्धिः । च । मे ।
सपीतिरिति स – पीतिः । च । मे । कृषिः । च । मे । वृष्टिः । च ।
मे । जैत्रम् । च । मे । औद्भिद्यमित्यौत्–भिद्यम् । च । मे । रयिः ।
च । मे । रायः । च । मे । पुष्टम् । च । मे । पुष्टिः । च । मे ।
विभ्विति वि – भु । च । **7 (50)**

**TS 4.7.4.2**

मे प्रभु च मे बहु च मे भूयश्च मे पूर्णं च मे पूर्णतरं च मे

ऽक्षितिश्च मे कूयवाश्च मेऽन्नं च मे ऽक्षुच्च मे व्रीहयश्च मे

यवाश्च मे माषाश्च मे तिलाश्च मे मुद्गाश्च मे खल्वाश्च मे

गोधूमाश्च मे मसुरा– ( ) –श्च मे प्रियंगवश्च मे ऽणवश्च मे

श्यामाकाश्च मे नीवाराश्च मे ॥ **8**

**TS 4.7.4.2 - Padam**

मे । प्रभ्विति प्र – भु । च । मे । बहु । च । मे । भूयः । च । मे ।

पूर्णम् । च । मे । पूर्णतरमिति पूर्ण – तरम् । च । मे । अक्षितिः ।

च । मे । कूयवाः । च । मे । अन्नम् । च । मे । अक्षुत् । च । मे ।

व्रीहयः । च । मे । यवाः । च । मे । माषाः । च । मे । तिलाः ।

च । मे । मुद्गाः । च । मे । खल्वाः । च । मे । गोधूमाः । च ।

मे । मसुराः ( ) । च । मे । प्रियंगवः । च । मे । अणवः । च ।

मे । श्यामाकाः । च । मे । नीवाराः । च । मे ॥ **8 (64)**

*(विभु च – मसुरा – श्चतुर्दश च) (A4)*

**TS 4.7.5.1**

अश्मा च मे मृत्तिका च मे गिरयश्च मे पर्वताश्च मे सिकताश्च मे वनस्पतयश्च मे हिरण्यं च मे ऽयश्च मे सीसं च मे **त्रपुश्च** मे श्यामं च मे लोहं च मेऽग्निश्च म आपश्च मेवीरुधश्च म ओषधयश्च मे कृष्टपच्यं च – [ ] **9**

**TS 4.7.5.1 - Padam**

अश्मा । च । मे । मृत्तिका । च । मे । गिरयः । च । मे । पर्वताः । च । मे । सिकताः । च । मे । वनस्पतयः । च । मे । हिरण्यम् । च । मे । अयः । च । मे । सीसम् । च । मे । त्रपु । च । मे । श्यामम् । च । मे । लोहम् । च । मे । अग्निः । च । मे । आपः । च । मे । वीरुधः । च । मे । ओषधयः । च । मे । कृष्टपच्यमिति कृष्ट – पच्यम् । च । **9 (50)**

**TS 4.7.5.2**

मे ऽकृष्टपच्यं च मे ग्रांयाश्च मे पशव आरण्याश्च यज्ञेन कल्पन्तांँवित्तं च मे वित्तिश्च मे भूतं च मे भूतिश्च मे वसु च मे वसतिश्च मे कर्म च मे शक्तिश्च मेऽर्थश्च म एमश्च म इतिश्च मे गतिश्च मे ॥ **10**

**TS 4.7.5.2 - Padam**

मे । अकृष्टपच्यमित्यकृष्ट – पच्यम् । च । मे । ग्राम्याः । च । मे ।

पशवः । आरण्याः । च । यज्ञेन । कल्पन्ताम् । वित्तम् । च । मे ।

वित्तिः । च । मे । भूतम् । च । मे । भूतिः । च । मे । वसु । च ।

मे । वसतिः । च । मे । कर्म । च । मे । शक्तिः । च । मे । अर्थः ।

च । मे । एमः । च । मे । इतिः । च । मे । गतिः । च ।

मे ॥ **10 (48)** *(कृष्टपच्यं चा – ष्टाचत्वारिꣳशच्च) (A5)*

**TS 4.7.6.1**

अग्निश्च म इन्द्रश्च मे सोमश्च म इन्द्रश्च मे

सविता च म इन्द्रश्च मे सरस्वती च म इन्द्रश्च मे

पूषा च म इन्द्रश्च मे बृहस्पतिश्च म इन्द्रश्च मे

मित्रश्च म इन्द्रश्च मे वरुणश्च म इन्द्रश्च मे त्वष्टा च – [ ] **11**

**TS 4.7.6.1 - Padam**

अग्निः । च । मे । इन्द्रः । च । मे । सोमः । च । मे । इन्द्रः । च ।

मे । सविता । च । मे । इन्द्रः । च । मे । सरस्वती । च । मे ।

इन्द्रः । च । मे । पूषा । च । मे । इन्द्रः । च । मे । बृहस्पतिः ।

च । मे । इन्द्रः । च । मे । मित्रः । च । मे । इन्द्रः । च । मे ।
वरुणः । च । मे । इन्द्रः । च । मे । त्वष्टा । च । **11 (50)**

**TS 4.7.6.2**

म इन्द्रश्च मे धाता च म इन्द्रश्च मे
विष्णुश्च म इन्द्रश्च मेऽश्विनौ च म इन्द्रश्च मे
मरुतश्च म इन्द्रश्च मे विश्वे च मे देवा इन्द्रश्च मे
पृथिवी च म इन्द्रश्च मेऽन्तरिक्षं च म इन्द्रश्च मे
द्यौश्च म ( ) इन्द्रश्च मे दिशश्च म इन्द्रश्च मे
मूर्द्धा च म इन्द्रश्च मे प्रजापतिश्च म इन्द्रश्च मे ॥ **12**

**TS 4.7.6.2 - Padam**

मे । इन्द्रः । च । मे । धाता । च । मे । इन्द्रः । च । मे । विष्णुः ।
च । मे । इन्द्रः । च । मे । अश्विनौ । च । मे । इन्द्रः । च । मे ।
मरुतः । च । मे । इन्द्रः । च । मे । विश्वे । च । मे । देवाः ।
इन्द्रः । च । मे । पृथिवी । च । मे । इन्द्रः । च । मे । अन्तरिक्षम् ।
च । मे । इन्द्रः । च । मे । द्यौः । च । मे ( ) । इन्द्रः । च । मे ।

दिशः । च । मे । इन्द्रः । च । मे । मूर्द्धा । च । मे । इन्द्रः । च ।
मे । प्रजापतिरिति प्रजा – पतिः । च । मे । इन्द्रः ।
च । मे ॥ **12 (71)** *(त्वष्टा च – द्यौश्च म – एकवि॒ꣳशतिश्च) (A6)*

**TS 4.7.7.1**

अ॒ꣳशुश्च मे र॒श्मिश्च मे ऽदाभ्यश्च मेऽधिपतिश्च म
उपा॒ꣳशुश्च मे ऽन्तर्यामश्च म ऐन्द्रवायवश्च मे
मैत्रावरुणश्च म आश्विनश्च मे प्रतिप्रस्थानश्च मे शुक्रश्च मे
मन्थी च म आग्रयणश्च मे वैश्वदेवश्च मे ध्रुवश्च मे
वैश्वानरश्च म ऋतुग्रहाश्च– [ ] **13**

**TS 4.7.7.1 - Padam**

अ॒ꣳशुः । च । मे । र॒श्मिः । च । मे । अदाभ्यः । च । मे ।
अधिपतिरित्यधि – पतिः । च । मे । उपा॒ꣳशुरित्युप–अ॒ꣳशुः । च ।
मे । अन्तर्याम इत्यन्तः–यामः । च । मे । ऐन्द्रवायव इत्यैन्द्र–वायवः ।
च । मे । मैत्रावरुण इति मैत्रा – वरुणः । च । मे । आश्विनः । च ।
मे । प्रतिप्रस्थान इति प्रति – प्रस्थानः । च । मे । शुक्रः । च । मे ।

मन्थी । च । मे । आग्रयणः । च । मे । वैश्वदेव इति वैश्व – देवः ।

च । मे । ध्रुवः । च । मे । वैश्वानरः । च । मे ।

ऋतुग्रहा इत्यृतु – ग्रहाः । च । **13 (50)**

**TS 4.7.7.2**

मे ऽतिग्राह्याश्च म ऐन्द्राग्नश्च मे वैश्वदेवश्च मे

मरुत्वतीयाश्च मे माहेन्द्रश्च म आदित्यश्च मे सावित्रश्च मे

सारस्वतश्च मे पौष्णश्च मे पात्नीवतश्च मे हारियोजनश्च मे ॥ **14**

**TS 4.7.7.2 - Padam**

मे । अतिग्राह्या इत्यति–ग्राह्याः । च । मे । ऐन्द्राग्न इत्यैन्द्र–अग्नः ।

च । मे । वैश्वदेव इति वैश्व – देवः । च । मे । मरुत्वतीयाः । च ।

मे । माहेन्द्र इति माहा – इन्द्रः । च । मे । आदित्यः । च । मे ।

सावित्रः । च । मे । सारस्वतः । च । मे । पौष्णः । च । मे ।

पात्नीवत इति पात्नी–वतः । च । मे । हारियोजन इति हारि–योजनः ।

च । मे ॥ **14 (34)**

*(ऋतुग्रहाश्च – चतुस्त्रिꣳशच्च ) (A7)*

**TS 4.7.8.1**

इद्ध्मश्च मे बर्.हिश्च मे वेदिश्च मे धिष्णियाश्च मे

स्रुचश्च मे चमसाश्च मे ग्रावाणश्च मे स्वरवश्च म

उपरवाश्च मेऽधिषवणे च मे द्रोणकलशश्च मे

वायव्यानि च मे पूतभृच्च म आधवनीयश्च म आग्नीद्ध्रं च मे

हविर्द्धानं च मे गृहाश्च ( ) मे सदश्च मे पुरोडाशाश्च मे

पचताश्च मेऽवभृथश्च मे स्वगाकारश्च मे ॥ 15

**TS 4.7.8.1 - Padam**

इद्ध्मः । च । मे । बर्.हिः । च । मे । वेदिः । च । मे । धिष्णियाः ।

च । मे । स्रुचः । च । मे । चमसाः । च । मे । ग्रावाणः । च । मे ।

स्वरवः । च । मे । उपरवा इत्युप – रवाः । च । मे । अधिषवणे

इत्यधि – सवने । च । मे । द्रोणकलश इति द्रोण–कलशः । च ।

मे । वायव्यानि । च । मे । पूतभृदिति पूत – भृत् । च । मे ।

आधवनीय इत्या – धवनीयः । च । मे ।

आग्नीद्ध्रमित्याग्नि–इद्ध्रम् । च । मे । हविर्द्धानमिति

हविः – धानम् । च । मे । गृहाः । च ( ) । मे । सदः । च । मे ।

पुरोडाशाः । च । मे । पचताः । च । मे । अवभृथ इत्यव – भृथः ।

च । मे । स्वगाकार इति स्वगा – कारः । च । मे ॥ **15 (66)**

*(गृहाश्च – षोडश च) (A8)*

**TS 4.7.9.1**

अग्निश्च मे घर्मश्च मेऽर्कश्च मे सूर्यश्च मे

प्राणश्च मे ऽश्वमेधश्च मे पृथिवी च मे ऽदितिश्च मे

दितिश्च मे द्यौश्च मे शक्वरीरङ्गुलयो दिशश्च मे

यज्ञेन कल्पन्ता– मृक्च मे साम च मे स्तोमश्च मे

यजुश्च मे दीक्षा ( ) च मे तपश्च म ऋतुश्च मे व्रतं च मे

ऽहोरात्रयो र्वृष्ट्या बृहद्रथन्तरे च मे यज्ञेन कल्पेतां ॥ **16**

**TS 4.7.9.1 - Padam**

अग्निः । च । मे । घर्मः । च । मे । अर्कः । च । मे । सूर्यः । च ।

मे । प्राण इति प्र – अनः । च । मे । अश्वमेध इत्यश्व–मेधः । च ।

मे । पृथिवी । च । मे । अदितिः । च । मे । दितिः । च । मे ।
द्यौः । च । मे । शक्वरीः । अङ्गुलयः । दिशः । च । मे । यज्ञेन ।
कल्पन्ताम् । ऋक् । च । मे । साम । च । मे । स्तोमः । च । मे ।
यजुः । च । मे । दीक्षा ( ) । च । मे । तपः । च । मे । ऋतुः ।
च । मे । व्रतम् । च । मे । अहोरात्रयोरित्यहः – रात्रयोः । वृष्ट्या ।
बृहद्रथन्तरे इति बृहत् – रथन्तरे । च । मे । यज्ञेन ।
कल्पेताम् ॥ **16 (68)** *(दीक्षा – ऽष्टादश च ) (A9)*

**TS 4.7.10.1**

गर्भाश्च मे वथ्साश्च मे त्र्यविश्च मे त्र्यवी च मे दित्यवाट् च मे दित्यौही
च मे पञ्चाविश्च मे पञ्चावी च मे त्रिवथ्सश्च मे त्रिवथ्सा च मे
तुर्यवाट् च मे तुर्यौही च मे पष्ठवाच् च मे पष्ठौही च म उक्षा च मे
वशा च म ऋषभश्च – [ ] **17**

**TS 4.7.10.1 - Padam**

गर्भाः । च । मे । वथ्साः । च । मे । त्र्यविरिति त्रि – अविः । च ।
मे । त्र्यवीति त्रि – अवी । च । मे । दित्यवाडिति दित्य – वाट् ।

च । मे । दित्यौही । च । मे । पञ्चाविरिति पञ्च – अविः । च । मे । पञ्चावीति पञ्च–अवी । च । मे । त्रिवथ्स इति त्रि–वथ्सः । च । मे । त्रिवथ्सेति त्रि – वथ्सा । च । मे । तुर्यवाडिति तुर्य – वाट् । च । मे । तुर्यौही । च । मे । पष्ठवादिति पष्ठ – वात् । च । मे । पष्ठौही । च । मे । उक्षा । च । मे । वशा । च । मे । ऋषभः । च । **17 (50)**

**<u>TS 4.7.10.2</u>**

मे वेहच्च मे ऽनड्वान् च मे धेनुश्च म आयुर्यज्ञेन कल्पतां प्राणो यज्ञेन कल्पता–मपानो यज्ञेन कल्पतां ँव्यानो यज्ञेन कल्पतां चक्षु–र्यज्ञेन कल्पता७ श्रोत्रं ँयज्ञेन कल्पतां मनो यज्ञेन कल्पतां ँवाग् यज्ञेन कल्पता–मात्मा यज्ञेन कल्पतां ँयज्ञो यज्ञेन कल्पतां ॥ **18**

**<u>TS 4.7.10.2 - Padam</u>**

मे । वेहत् । च । मे । अनड्वान् । च । मे । धेनुः । च । मे । आयुः । यज्ञेन । कल्पताम् । प्राण इति प्र – अनः । यज्ञेन ।

कल्पताम् । अपान इत्यप – अनः । यज्ञेन । कल्पताम् । व्यान इति वि – अनः । यज्ञेन । कल्पताम् । चक्षुः । यज्ञेन । कल्पताम् । श्रोत्रम् । यज्ञेन । कल्पताम् । मनः । यज्ञेन । कल्पताम् । वाक् । यज्ञेन । कल्पताम् । आत्मा । यज्ञेन । कल्पताम् । यज्ञः । यज्ञेन । कल्पताम् ॥ **18 (40)**

*(ऋषभश्च – चत्वारिꣳशच्च) (A10)*

**TS 4.7.11.1**

एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकविꣳशतिश्च मे त्रयोविꣳशतिश्च मे पञ्चविꣳशतिश्च मे सप्तविꣳशतिश्च मे नवविꣳशतिश्च म एकत्रिꣳशच्च मे त्रयस्त्रिꣳशच्च– [ ] **19**

**TS 4.7.11.1 - Padam**

एका । च । मे । तिस्रः । च । मे । पञ्च । च । मे । सप्त । च । मे । नव । च । मे । एकादश । च । मे । त्रयोदशेति त्रयः – दश ।

च । मे । पञ्चदशेति पञ्च–दश । च । मे । सप्तदशेति सप्त – दश । च । मे । नवदशेति नव – दश । च । मे । एकविꣳशतिरित्येक – विꣳशतिः । च । मे । त्रयोविꣳशतिरिति त्रयः–विꣳशतिः । च । मे । पञ्चविꣳशतिरिति पञ्च–विꣳशतिः । च । मे । सप्तविꣳशतिरिति सप्त –विꣳशतिः । च । मे । नवविꣳशतिरिति नव – विꣳशतिः । च । मे । एकत्रिꣳशदित्येक – त्रिꣳशत् । च । मे । त्रयस्त्रिꣳशदिति त्रयः – त्रिꣳशत् । च । **19 (50)**

**<u>TS 4.7.11.2</u>**

मे चतस्रश्च मे ऽष्टौ च मे द्वादश च मे षोडश च मे विꣳशतिश्च मे चतुर्विꣳशतिश्च मे ऽष्टाविꣳशतिश्च मे द्वात्रिꣳशच्च मे षट्त्रिꣳशच्च मे चत्वारिꣳशच्च मे चतुश्चत्वारिꣳशच्च मे ऽष्टाचत्वारिꣳशच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्द्धा च व्यश्ञियश्चा–( )–न्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥ **20**

**TS 4.7.11.2 - Padam**

मे । चतस्रः । च । मे । अष्टौ । च । मे । द्वादश । च । मे ।
षोडश । च । मे । वि॒ꣳशतिः । च । मे । चतुर्वि॒ꣳशतिरिति
चतुः – वि॒ꣳशतिः । च । मे । अष्टावि॒ꣳशतिरित्यष्टा – वि॒ꣳशतिः ।
च । मे । द्वात्रि॒ꣳशत् । च । मे । षट्त्रि॒ꣳशदिति षट् – त्रि॒ꣳशत् ।
च । मे । चत्वारि॒ꣳशत् । च । मे ।
चतुश्चत्वारि॒ꣳशदिति चतुः – चत्वारि॒ꣳशत् । च । मे ।
अष्टाचत्वारि॒ꣳशदित्यष्टा – चत्वारि॒ꣳशत् । च । मे । वाजः । च ।
प्रसव इति प्र – सवः । च । अपिज इत्यपि–जः । च । क्रतुः । च ।
सुवः । च । मूर्द्धा । च । व्यश्ञिय इति वि – अश्ञियः ( ) । च ।
आन्त्यायनः । च । अन्त्यः । च । भौवनः । च । भुवनः । च ।
अधिपतिरित्यधि – पतिः । च ॥ **20 (61)**

*(त्रयस्त्रि॒ꣳशच्च – व्यश्ञिय – एकादश च ) (A11)*

**TS 4.7.12.1**

वाजो नः सप्त प्रदिशश्चतस्रो वा परावतः ।

वाजो नो विश्वैर्देवै–र्धनसाताविहावतु ॥

विश्वे अद्य मरुतो विश्व ऊती विश्वे भवन्त्वग्नयः समिद्धाः ।

विश्वे नो देवा अवसा ऽऽ गमन्तु विश्वमस्तु द्रविणं ँवाजो अस्मे ॥

वाजस्य प्रसवं देवा रथैर्याता हिरण्ययैः ।

अग्निरिन्द्रो बृहस्पतिर्मरुतः सोमपीतये ॥

वाजेवाजे ऽवत वाजिनो नो धनेषु – [ ] **21**

**TS 4.7.12.1 - Padam**

वाजः । नः । सप्त । प्रदिश इति प्र – दिशः । चतस्रः । वा ।

परावत इति परा – वतः ॥ वाजः । नः । विश्वैः । देवैः ।

धनसाताविति धन – सातौ । इह । अवतु ॥ विश्वे । अद्य । मरुतः ।

विश्वे । ऊती । विश्वे । भवन्तु । अग्नयः । समिद्धा इति सं – इद्धाः ॥

विश्वे । नः । देवाः । अवसा । एति । गमन्तु । विश्वम् । अस्तु ।

द्रविणम् । वाजः । अस्मे इति ॥ वाजस्य । प्रसवमिति प्र – सवम् ।

देवाः । रथैः । यात । हिरण्ययैः ॥ अग्निः । इन्द्रः । बृहस्पतिः ।
मरुतः । सोमपीतय इति सोम – पीतये ॥ वाजेवाज इति
वाजे – वाजे । अवत । वाजिनः । नः । धनेषु । **21 (50)**

**TS 4.7.12.2**

विप्रा अमृता ऋतज्ञाः ।
अस्य मद्ध्वः पिबत मादयद्ध्वं तृप्ता यात पथिभिर्देवयानैः ॥
वाजः पुरस्तादुत मद्ध्यतो नो वाजो देवाꣳ ऋतुभिः कल्पयाति ।
वाजस्य हि प्रसवो नन्नमीति विश्वा आशा वाजपतिर्भवेयं ॥
पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धां ।
पयस्वतीः प्रदिशः सन्तु मह्यं ॥
सं मा सृजामि पयसा घृतेन सं मा सृजाम्यप – [ ] **22**

**TS 4.7.12.2 - Padam**

विप्राः । अमृताः । ऋतज्ञा इत्यृत – ज्ञाः ॥ अस्य । मद्ध्वः । पिबत ।
मादयद्ध्वम् । तृप्ताः । यात । पथिभिरिति पथि – भिः । देवयानैरिति
देव – यानैः ॥ वाजः । पुरस्तात् । उत । मद्ध्यतः । नः । वाजः ।

देवान् । ऋतुभिरित्यृतु – भिः । कल्पयाति ॥ वाजस्य । हि ।
प्रसव इति प्र – सवः । नन्नमीति । विश्वाः । आशाः । वाजपतिरिति
वाज – पतिः । भवेयम् ॥ पयः । पृथिव्याम् । पयः । ओषधीषु ।
पयः । दिवि । अन्तरिक्षे । पयः । धाम् ॥ पयस्वतीः ।
प्रदिश इति प्र – दिशः । सन्तु । मह्यम् ॥ समिति । मा । सृजामि ।
पयसा । घृतेन । समिति । मा । सृजामि । अपः । **22 (50)**

**TS 4.7.12.3**

ओषधीभिः ।

सोऽहं वाजꣳ सनेयमग्ने ॥

नक्तोषासा समनसा विरूपे धापयेते शिशुमेकꣳ समीची ।
द्यावा क्षामा रुक्मो अन्तर्वि भाति देवा अग्निं धारयन् द्रविणोदाः ॥
समुद्रोऽसि नभस्वानार्द्रदानुः शंभूर्मयोभूरभि मा वाहि स्वाहा
मारुतोऽसि मरुतां गणः शंभूर्मयोभूरभि मा वाहि स्वाहा
ऽवस्युरसि दुवस्वाञ्छंभूर्मयोभूरभि मा ( ) वाहि स्वाहा ॥ **23**

**TS 4.7.12.3 - Padam**

ओषधीभिरित्योषधि - भिः ॥ सः । अहम् । वाजम् । सनेयम् ।
अग्ने ॥ नक्तोषासा । समनसेति स-मनसा । विरूपे इति वि-रूपे ।
धापयेते इति । शिशुम् । एकम् । समीची इति ॥ द्यावा । क्षाम ।
रुक्मः । अन्तः । वीति । भाति । देवाः । अग्निम् । धारयन्न् ।
द्रविणोदा इति द्रविणः - दाः ॥ समुद्रः । असि । नभस्वान् ।
आर्द्रदानुरित्यार्द्र-दानुः । शंभूरिति शं-भूः । मयोभूरिति मयः-भूः ।
अभीति । मा । वाहि । स्वाहा । मारुतः । असि । मरुताम् । गणः ।
शंभूरिति शं - भूः । मयोभूरिति मयः - भूः । अभीति । मा ।
वाहि । स्वाहा । अवस्युः । असि । दुवस्वान् । शंभूरिति
शं - भूः । मयोभूरिति मयः - भूः । अभीति । मा ( ) । वाहि ।
स्वाहा ॥ **23 (52)**

*(धर्ने - ष्वपो - दुवस्वाञ्छंभूर्मयोभूरभि मा - द्वे च ) (A12)*

**TS 4.7.13.1**

अग्निं ँयुनज्मि शवसा घृतेन दिव्यꣳ सुपर्णं ँवयसा बृहन्तं ।

तेन वयं पतेम ब्रद्ध्नस्य विष्टपꣳ सुवो रुहाणा अधि नाक उत्तमे ॥

इमौ ते पक्षावजरौ पतत्रिणो याभ्याꣳ रक्षाꣳस्यपहꣳस्यग्ने ।

ताभ्यां पतेम सुकृतामु लोकं ँयत्रर्.षयः प्रथमजा ये पुराणाः ॥

चिदसि समुद्रयोनि–रिन्दुर्दक्षः श्येन ऋतावा ।

हिरण्यपक्षः शकुनो भुरण्यु–र्महान्थ् सधस्थे ध्रुव – [ ] **24**

**TS 4.7.13.1 - Padam**

अग्निम् । युनज्मि । शवसा । घृतेन । दिव्यम् । सुपर्णमिति

सु – पर्णम् । वयसा । बृहन्तम् ॥ तेन । वयम् । पतेम । ब्रद्ध्नस्य ।

विष्टपम् । सुवः । रुहाणाः । अधीति । नाके । उत्तम इत्युत् – तमे ॥

इमौ । ते । पक्षौ । अजरौ । पतत्रिणः । याभ्याम् । रक्षाꣳसि ।

अपहꣳसीत्यप – हꣳसि । अग्ने ॥ ताभ्याम् । पतेम ।

सुकृतामिति सु – कृताम् । उ । लोकम् । यत्र । ऋषयः ।

प्रथमजा इति प्रथम – जाः । ये । पुराणाः ॥ चित् । असि ।

समुद्रयोनिरिति समुद्र – योनिः । इन्दुः । दक्षः । श्येनः ।
ऋतावेत्यृत – वा ॥ हिरण्यपक्ष इति हिरण्य – पक्षः । शकुनः ।
भुरण्युः । महान् । सधस्थ इति सध – स्थे । ध्रुवः । **24 (50)**

**TS 4.7.13.2**

आ निषत्तः ॥

नमस्ते अस्तु मा मा हिꣳसीर्विश्वस्य मूर्द्धन्नधि तिष्ठसि श्रितः ।
समुद्रे ते हृदय–मन्तरायु–र्द्यावापृथिवी भुवनेष्वर्पिते ॥
उद्नो दत्तोदधिं भिन्त दिवः पर्जन्यादन्तरिक्षात् पृथिव्यास्ततो नो
वृष्ट्यावत ।
दिवो मूर्द्धाऽसि पृथिव्या नाभि–रूर्गपा–मोषधीनां ।
विश्वायुः शर्म सप्रथा नमस्पथे ॥
येनर्.षयस्तपसा सत्र – [ ] **25**

**TS 4.7.13.2 - Padam**

एति । निषत्त इति नि – सत्तः ॥ नमः । ते । अस्तु । मा । मा ।
हिꣳसीः । विश्वस्य । मूर्द्धन्न् । अधीति । तिष्ठसि । श्रितः ॥ समुद्रे ।

ते । हृदयम् । अन्तः । आयुः । द्यावापृथिवी इति द्यावा – पृथिवी ।
भुवनेषु । अर्पिते इति ॥ उद्नः । दत्त । उदधिमित्युद–धिम् । भिन्त ।
दिवः । पर्जन्यात् । अन्तरिक्षात् । पृथिव्याः । ततः । नः । वृष्ट्या ।
अवत ॥ दिवः । मूर्द्धा । असि । पृथिव्याः । नाभिः । ऊर्क् । अपाम् ।
ओषधीनाम् ॥ विश्वायुरिति विश्व – आयुः । शर्म । सप्रथा इति
स – प्रथाः । नमः । पथे ॥ येन । ऋषयः । तपसा । सत्रम् । **25 (50)**

**<u>TS 4.7.13.3</u>**

मासतेन्धाना अग्निꣳ सुवराभरन्तः ।
तस्मिन्नहं नि दधे नाके अग्निमेतं ँयमाहुर्मनव स्तीर्णबर्.हिषं ॥
तं पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ।
नाकं गृह्णानाः सुकृतस्य लोके तृतीये पृष्ठे अधि रोचने दिवः ॥
आ वाचो मद्ध्य–मरुहद्–भुरण्युरय–मग्निः सत्पतिश्चेकितानः ।
पृष्ठे पृथिव्या निहितो दविद्युतदधस्पदं कृणुते – [ ] **26**

**TS 4.7.13.3 - Padam**

आसत । इन्धानाः । अग्निम् । सुवः । आभरन्त इत्या – भरन्तः ॥

तस्मिन्न् । अहम् । नीति । दधे । नाके । अग्निम् । एतम् । यम् ।

आहुः । मनवः । स्तीर्णबर्.हिषमिति स्तीर्ण – बर्.हिषम् ॥ तम् ।

पत्नीभिः । अन्विति । गच्छेम । देवाः । पुत्रैः । भ्रातृभिरिति

भ्रातृ – भिः । उत । वा । हिरण्यैः ॥ नाकम् । गृह्णानाः ।

सुकृतस्येति सु – कृतस्य । लोके । तृतीये । पृष्ठे । अधीति ।

रोचने । दिवः ॥ एति । वाचः । मद्ध्यम् । अरुहत् । भुरण्युः ।

अयम् । अग्निः । सत्पतिरिति सत् – पतिः । चेकितानः ॥

पृष्ठे । पृथिव्याः । निहित इति नि – हितः । दविद्युतत् ।

अधस्पदमित्यधः – पदम् । कृणुते । **26 (50)**

**TS 4.7.13.4**

ये पृतन्यवः ॥

अयमग्निर्वीरतमो वयोधाः सहस्रियो दीप्यतामप्रयुच्छन्न् ।

विभ्राजमानः सरिरस्य मद्ध्य उप प्र यात दिव्यानि धाम ॥

सं प्र च्यवद्ध्वमनु सं प्र याताग्ने पथो देवयानान् कृणुद्ध्वं ।
अस्मिन्थ् सधस्थे अद्ध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥
येना सहस्रं ँवहसि येनाग्ने सर्ववेदसं ।
तेनेमं ँयज्ञं नो वह देवयानो य – [ ] **27**

**TS 4.7.13.4 - Padam**

ये । पृतन्यवः ॥ अयम् । अग्निः । वीरतम इति वीर – तमः ।
वयोधा इति वयः – धाः । सहस्रियः । दीप्यताम् ।
अप्रयुच्छन्नित्यप्र – युच्छन्न् ॥ विभ्राजमान इति वि – भ्राजमानः ।
सरिरस्य । मद्ध्ये । उप । प्रेति । यात । दिव्यानि । धाम ॥ सम् ।
प्रेति । च्यवद्ध्वम् । अन्विति । सम् । प्रेति । यात । अग्ने । पथः ।
देवयानानिति देव – यानान् । कृणुद्ध्वम् ॥ अस्मिन्न् । सधस्थ इति
सध – स्थे । अधीति । उत्तरस्मिन्नित्युत्–तरस्मिन्न् । विश्वे । देवाः ।
यजमानः । च । सीदत ॥ येन । सहस्रम् । वहसि । येन । अग्ने ।
सर्ववेदसमिति सर्व – वेदसम् ॥ तेन । इमम् । यज्ञम् । नः । वह ।
देवयान इति देव – यानः । यः । **27 (50)**

**TS 4.7.13.5**

उत्तमः ॥

उद्–बुद्ध्यस्वाग्ने प्रति जागृह्येन–मिष्टापूर्ते सꣳ सृजेथामयं च ।

पुनः कृण्वꣳस्त्वा पितरं ँयुवान–मन्वाताꣳसीत् त्वयि तन्तुमेतं ॥

अयं ते योनिर्. ऋत्वियो यतो जातो अरोचथाः ।

तं जानन्नग्न आ रोहा**था** नो **वर्द्धया** रयिं ॥ 28

**TS 4.7.13.5 - Padam**

उत्तम इत्युत्–तमः ॥ उदिति । बुद्ध्यस्व । अग्ने । प्रतीति । जागृहि ।

एनम् । इष्टापूर्ते इतीष्टा – पूर्ते । समिति । सृजेथाम् । अयम् । च ॥

पुनः । कृण्वन्न् । त्वा । पितरम् । युवानम् ।

अन्वाताꣳसीदित्यनु–आताꣳसीत् । त्वयि । तन्तुम् । एतम् ॥ अयम् ।

ते । योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ॥ तम् । जानन्न् ।

अग्ने । एति । रोह । अथ । नः । वर्द्धय । रयिम् ॥ 28 (37)

*(ध्रुवः – सत्रं – कृणुते – यः – सप्तत्रिꣳशच्च ) (A13)*

**TS 4.7.14.1**

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेन्धाना स्तनुवं पुषेम ।

मह्यं नमन्तां प्रदिशश्चतस्र स्त्वया-ऽद्ध्यक्षेण पृतना जयेम ॥

मम देवा विहवे सन्तु सर्व इन्द्रावन्तो मरुतो विष्णुरग्निः ।

ममान्तरिक्ष-मुरु गोपमस्तु मह्यँ वातः पवतां कामे अस्मिन्न् ॥

मयि देवा द्रविण-मा यजन्तां मय्याशी-रस्तु मयि देवहूतिः ।

दैव्या होतारा वनिषन्त – [ ] **29**

**TS 4.7.14.1 - Padam**

मम । अग्ने । वर्चः । विहवेष्विति वि – हवेषु । अस्तु । वयम् ।

त्वा । इन्धानाः । तनुवम् । पुषेम ॥ मह्यम् । नमन्ताम् । प्रदिश इति

प्र – दिशः । चतस्रः । त्वया । अद्ध्यक्षेणेत्यधि – अक्षेण । पृतनाः ।

जयेम ॥ मम । देवाः । विहव इति वि – हवे । सन्तु । सर्वे ।

इन्द्रावन्त इतीन्द्र – वन्तः । मरुतः । विष्णुः । अग्निः ॥ मम ।

अन्तरिक्षम् । उरु । गोपम् । अस्तु । मह्यम् । वातः । पवताम् ।

कामे । अस्मिन्न् ॥ मयि । देवाः । द्रविणम् । एति । यजन्ताम् । मयि ।

आशीरित्या – शीः । अस्तु । मयि । देवहूतिरिति देव – हूतिः ॥

दैव्या । होतारा । वनिषन्त । **29 (50)**

**TS 4.7.14.2**

पूर्वे ऽरिष्टाः स्याम तनुवा सुवीराः ॥

मह्यं यँजन्तु मम यानि हव्या ऽऽकूतिः सत्या मनसो मे अस्तु ।

एनो मा निगां कतमच्चनाहं विँश्वे देवासो अधि वोचता मे ॥

देवीः षडुर्वी–रुरु णः कृणोत विश्वे देवास इह वीरयद्ध्वं ।

मा हास्महि प्रजया मा तनूभिर्मा रधाम द्विषते सोम राजन् ॥

अग्निर्मन्युं प्रतिनुदन् पुरस्ता– [ ] **30**

**TS 4.7.14.2 - Padam**

पूर्वे । अरिष्टाः । स्याम । तनुवा । सुवीरा इति सु – वीराः ॥ मह्यम् ।

यजन्तु । मम । यानि । हव्या । आकूतिरित्या – कूतिः । सत्या ।

मनसः । मे । अस्तु ॥ एनः । मा । नीति । गाम् । कतमत् । चन ।

अहम् । विश्वे । देवासः । अधीति । वोचत । मे ॥ देवीः । षडुर्वीरिति

षट् – उर्वीः । उरु । नः । कृणोत । विश्वे । देवासः । इह ।

वीरयद्ध्वम् ॥ मा । हास्महि । प्रजयेति प्र – जया । मा । तनूभिः ।

मा । रधाम । द्विषते । सोम । राजन्न् ॥ अग्निः । मन्युम् ।

प्रतिनुदन्निति प्रति – नुदन्न् । पुरस्तात् । **30 (50)**

**TS 4.7.14.3**

ददब्धो गोपाः परि पाहि नस्त्वं ।

प्रत्यञ्चो यन्तु निगुतः पुनस्ते ऽमैषां चित्तं प्रबुधा वि नेशत् ॥

धाता धातृणां भुवनस्य यस्पति र्देवꣳ सवितार–मभिमातिषाहं ।

इमं ँयज्ञ मश्विनोभा बृहस्पति र्देवाः पान्तु यजमानं न्यर्थात् ॥

उरुव्यचा नो महिषः शर्म यꣳसदस्मिन्. हवे पुरुहूतः पुरुक्षु ।

स नः प्रजायै हर्यश्व मृडयेन्द्र मा – [ ] **31**

**TS 4.7.14.3 - Padam**

अदब्धः । गोपा इति गो – पाः । परीति । पाहि । नः । त्वम् ॥

प्रत्यञ्चः । यन्तु । निगुत इति नि–गुतः । पुनः । ते । अमा ।

एषाम् । चित्तम् । प्रबुधेति प्र – बुधा । वीति । नेशत् ॥ धाता ।

धातृणाम् । भुवनस्य । यः । पतिः । देवम् । सवितारम् ।

अभिमातिषाहमित्यभिमाति–साहम् ॥ इमम् । यज्ञम् । अश्विना । उभा । बृहस्पतिः । देवाः । पान्तु । यजमानम् । न्यर्थादिति नि– अर्थात् ॥ उरुव्यचा इत्युरु–व्यचाः । नः । महिषः । शर्म । य॒॑सत् । अस्मिन्न् । हवे । पुरुहूत इति पुरु – हूतः । पुरुक्षु ॥ सः । नः । प्रजाय इति प्र – जायै । हर्यश्वेति हरि – अश्व । मृडय । इन्द्र । मा । **31 (50)**

**TS 4.7.14.4**

नो रीरिषो मा परा दाः ॥

ये नः सपत्ना अप ते भवन्त्विन्द्राग्निभ्या–मव बाधामहे तान् ।

वसवो रुद्रा आदित्या उपरिस्पृशं मोग्रं चेत्तार–मधि राज–मक्रन्न् ॥

अर्वाञ्च मिन्द्रममुतो हवामहे यो गोजिद्–धनजिदश्वजिद्–यः ।

इमन्नो यज्ञं ँविहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा ॥ **32**

**TS 4.7.14.4 - Padam**

नः । रीरिषः । मा । परेति । दाः ॥ ये । नः । सपत्नाः । अपेति । ते । भवन्तु । इन्द्राग्निभ्यामितीन्द्राग्नि–भ्याम् । अवेति । बाधामहे । तान् ॥ वसवः । रुद्राः । आदित्याः । उपरिस्पृशमित्युपरि – स्पृशम् । मा ।

उग्रम् । चेत्तारम् । अधिराजमित्यधि – राजम् । अक्रन्न् ॥ अर्वाञ्चम् ।

इन्द्रम् । अमुतः । हवामहे । यः । गोजिदिति गो – जित् । धनजिदिति

धन – जित् । अश्वजिदित्यश्व – जित् । यः ॥ इमम् । नः । यज्ञम् ।

विहव इति वि – हवे । जुषस्व । अस्य । कुर्मः ।

हरिव इति हरि – वः । मेदिनम् । त्वा ॥ **32 (43)**

*(वनिषन्त – पुरस्तान् – मा – त्रिचत्वारि॑ शच्च) (A14)*

**TS 4.7.15.1**

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पाञ्चजन्यं बहवः समिन्धते ।

विश्वस्यां ँविशि प्रविविशिवा॑ंस–मीमहे स नो मुञ्चत्व॑ंहसः ॥

यस्येदं प्राणन्निमिषद् यदेजति यस्य जातं जनमानं च केवलं ।

स्तौम्यग्निं नाथितो जोहवीमि स नो मुञ्चत्व॑ंहसः ॥

इन्द्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नः स्तोमा उप मा–मुपागुः ।

यो दाशुषः सुकृतो हवमुप गन्ता – [ ] **33**

**TS 4.7.15.1 - Padam**

अग्नेः । मन्वे । प्रथमस्य । प्रचेतस इति प्र – चेतसः । यम् ।
पाञ्चजन्यमिति पाञ्च – जन्यम् । बहवः ।
समिन्धत इति सम् – इन्धते ॥ विश्वस्याम् । विशि ।
प्रविविशिवा(ग्)समिति प्र – विविशिवा(ग्)सम् । ईमहे । सः । नः ।
मुञ्चतु । अ(ग्)हसः ॥ यस्य । इदम् । प्राणदिति प्र – अनत् ।
निमिषदिति नि – मिषत् । यत् । एजति । यस्य । जातम् ।
जनमानम् । च । केवलम् ॥ स्तौमि । अग्निम् । नाथितः । जोहवीमि ।
सः । नः । मुञ्चतु । अ(ग्)हसः ॥ इन्द्रस्य । मन्ये । प्रथमस्य ।
प्रचेतस इति प्र – चेतसः । वृत्रघ्न इति वृत्र–घ्नः । स्तोमाः ।
उपेति । माम् । उपागुरित्युप – आगुः ॥ यः । दाशुषः ।
सुकृत इति सु – कृतः । हवम् । उपेति । गन्ता । **33 (50)**

**TS 4.7.15.2**

स नो मुञ्चत्व(ग्) हसः ॥
यः संग्रामं नयति सँ वशी युधे यः पुष्टानि स(ग्)सृजति त्रयाणि ।

स्तौमीन्द्रं नाथितो जोहवीमि स नो मुञ्चत्वꣳ हसः ॥

मन्वे वां मित्रावरुणा तस्य वित्तꣳ सत्यौजसा दृꣳहणा यं नुदेथे ।

या राजानꣳ सरथं ँयाथ उग्रा ता नो मुञ्चतमागसः ॥

यो वाꣳ रथ ऋजुरश्मिः सत्यधर्मा **मिथु श्च**रन्त–मुपयाति दूषयन्न् ।

स्तौमि – [ ] **34**

## TS 4.7.15.2 - Padam

सः । नः । मुञ्चतु । अꣳहसः ॥ यः । संग्राममिति सम् – ग्रामम् ।

नयति । समिति । वशी । युधे । यः । पुष्टानि । सꣳसृजतीति

सं–सृजति । त्रयाणि ॥ स्तौमि । इन्द्रम् । नाथितः । जोहवीमि । सः ।

नः । मुञ्चतु । अꣳहसः ॥ मन्वे । वाम् । मित्रावरुणेति

मित्रा – वरुणा । तस्य । वित्तम् । सत्यौजसेति सत्य – ओजसा ।

दृꣳहणा । यम् । नुदेथे इति ॥ या । राजानम् । सरथमिति स–रथम् ।

याथः । उग्रा । ता । नः । मुञ्चतम् । आगसः ॥ यः । वाम् । रथः ।

ऋजुरश्मिरित्यृजु – रश्मिः । सत्यधर्मेति सत्य – धर्मा । **मिथु** ।

चरन्तम् । उपयातीत्युप – याति । दूषयन्न् ॥ स्तौमि । **34 (50)**

**TS 4.7.15.3**

मित्रावरुणा नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥

वायोः सवितु र्विदथानि मन्महे यावात्मन्वद्–बिभृतो यौ च रक्षतः ।

यौ विश्वस्य परिभू बभूवतुस्तौ नो मुञ्चतमागसः ॥

उप श्रेष्ठा न आशिषो देवयोर्द्धर्मे अस्थिरन्न् ।

स्तौमि वायुꣳ सवितारं नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥

रथीतमौ रथीना–मह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः ।

ययो –[ ] **35**

**TS 4.7.15.3 - Padam**

मित्रावरुणेति मित्रा – वरुणा । नाथितः । जोहवीमि । तौ । नः ।

मुञ्चतम् । आगसः ॥ वायोः । सवितुः । विदथानि । मन्महे । यौ ।

आत्मन्वदित्यात्मन्न् – वत् । बिभृतः । यौ । च । रक्षतः ॥ यौ ।

विश्वस्य । परिभू इति परि – भूः । बभूवतुः । तौ । नः । मुञ्चतम् ।

आगसः ॥ उपेति । श्रेष्ठाः । नः । आशिष इत्या – शिषः । देवयोः ।

धर्मे । अस्थिरन्न् ॥ स्तौमि । वायुम् । सवितारम् । नाथितः ।

जोहवीमि । तौ । नः । मुञ्चतम् । आगसः ॥ रथीतमाविति

रथि – तमौ । रथीनाम् । अह्वे । ऊतये । शुभं । गमिष्ठौ ।

सुयमेभिरिति सु – यमेभिः । अश्वैः ॥ ययोः । **35 (50)**

**<u>TS 4.7.15.4</u>**

–र्वां देवौ देवेष्वनिशित–मोजस्तौ नो मुञ्चतमागसः ॥

यदयातं ँवँहतु॒ सूर्याया–स्त्रिचक्रेण स॒ सदमिच्छमानौ ।

स्तौमि देवा वश्विनौ नाथितो जोहवीमि तौ नो मुञ्चतमागसः ॥

मरुतां मन्वे अधि नो ब्रुवन्तु प्रेमां ँवाचं विश्वा मवन्तु विश्वे ।

आशून्. हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥

तिग्ममायुधं ँवीडित॒ सहस्वद् दिव्य॒ शर्द्धः – [ ] **36**

**<u>TS 4.7.15.4 - Padam</u>**

वाम् । देवौ । देवेषु । अनिशितमित्यनि–शितम् । ओजः । तौ । नः ।

मुञ्चतम् । आगसः ॥ यत् । अयातम् । वहतुम् । सूर्यायाः ।

त्रिचक्रेणेति त्रि – चक्रेण । स॒सदमिति सम् – सदम् । इच्छमानौ ॥

स्तौमि । देवौ । अश्विनौ । नाथितः । जोहवीमि । तौ । नः ।

मुञ्चतम् । आगसः ॥ मरुताम् । मन्वे । अधीति । नः । ब्रुवन्तु । प्रेति । इमाम् । वाचम् । विश्वाम् । अवन्तु । विश्वे ॥ आशून् । हुवे । सुयमानिति सु – यमान् । ऊतये । ते । नः । मुञ्चन्तु । एनसः ॥ तिग्मम् । आयुधम् । वीडितम् । सहस्वत् । दिव्यम् । शर्द्धः । **36 (50)**

**TS 4.7.15.5**

पृतनासु जिष्णु ।

स्तौमि देवान् मरुतो नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥

देवानां मन्वे अधि नो ब्रुवन्तु प्रेमां ँवाचं विश्वामवन्तु विश्वे ।

आशून्. हुवे सुयमानूतये ते नो मुञ्चन्त्वेनसः ॥

यदिदं माऽभिशोचति पौरुषेयेण दैव्येन ।

स्तौमि विश्वान् देवान् नाथितो जोहवीमि ते नो मुञ्चन्त्वेनसः ॥

अनु नोऽद्यानुमति–रन्वि – [ ] **37**

**TS 4.7.15.5 - Padam**

पृतनासु । जिष्णु ॥ स्तौमि । देवान् । मरुतः । नाथितः । जोहवीमि । ते । नः । मुञ्चन्तु । एनसः ॥ देवानाम् । मन्वे । अधीति । नः ।

ब्रुवन्तु । प्रेति । इमाम् । वाचम् । विश्वाम् । अवन्तु । विश्वे ॥ आशून् ।
हुवे । सुयमानिति सु – यमान् । ऊतये । ते । नः । मुञ्चन्तु ।
एनसः ॥ यत् । इदम् । मा । अभिशोचतीत्यभि–शोचति । पौरुषेयेण ।
दैव्येन ॥ स्तौमि । विश्वान् । देवान् । नाथितः । जोहवीमि । ते । नः ।
मुञ्चन्तु । एनसः ॥ अन्विति । नः । अद्य ।
अनुमतिरियनु – मतिः । अन्विति । **37 (50)**

**TS 4.7.15.6**

दनुमते त्वं वैँश्वानरो न ऊत्या पृष्टो दिवि ॥
ये अप्रथेता–ममितेभि–रोजोभिर्ये प्रतिष्ठे अभवतां वँसूनां ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतम॒ हसः ॥
उर्वी रोदसी वरिवः कृणोतं क्षेत्रस्य पत्नी अधि नो ब्रूयातं ।
स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुञ्चतम॒ हसः ॥
यत् ते वयं पुरुषत्रा यविष्ठाविद्वा॒स श्चकृमा कच्चना – [ ] **38**

**TS 4.7.15.6 - Padam**

इत् । अनुमत इत्यनु – मते । त्वम् । वैश्वानरः । नः । ऊत्या । पृष्टः । दिवि ॥ ये इति । अप्रथेताम् । अमितेभिः । ओजोभिरित्योजः – भिः । ये इति । प्रतिष्ठे इति प्रति – स्थे । अभवताम् । वसूनाम् ॥ स्तौमि । द्यावापृथिवी इति द्यावा – पृथिवी । नाथितः । जोहवीमि । ते इति । नः । मुञ्चतम् । अꣳहसः ॥ उर्वी इति । रोदसी इति । वरिवः । कृणोतम् । क्षेत्रस्य । पत्नी इति । अधीति । नः । ब्रूयातम् ॥ स्तौमि । द्यावापृथिवी इति द्यावा – पृथिवी । नाथितः । जोहवीमि । ते इति । नः । मुञ्चतम् । अꣳहसः ॥ यत् । ते । वयम् । पुरुषत्रेति पुरुष–त्रा । यविष्ठ । अविद्वाꣳसः । चकृम । कत् । चन । **38 (50)**

**TS 4.7.15.7**

ऽऽगः ।

कृधी स्वस्माꣳ अदितेरनागा व्येनाꣳसि शिश्रथो विष्वगग्ने ॥
यथा ह तद् वसवो गौर्यं चित् पदि षिता ममुञ्चता यजत्राः ।
एवा त्वमस्मत् प्र मुञ्चा व्यꣳहः प्रातार्यग्ने प्रतरान्न आयुः ॥ **39**

**TS 4.7.15.7 - Padam**

आगः ॥ कृधि । स्विति । अस्मान् । अदितेः । अनागाः । वीति ।

एनाꣳसि । शिश्रथः । विष्वक् । अग्ने ॥ यथा । ह । तत् । वसवः ।

गौर्यम् । चित् । पदि । सिताम् । अमुञ्चत । यजत्राः ॥ एव । त्वम् ।

अस्मत् । प्रेति । मुञ्च । वीति । अꣳहः । प्रेति । अतारि ।

अग्ने । प्रतरामिति प्र – तराम् । नः । आयुः ॥ **39 (34)**

*(गन्ता – दूषयन्थ् स्तौमि – ययोः – शर्द्धो – ऽनुमतिरनु – चन – चतुस्त्रिꣳशच्च) (A15)*

=================

**Special Korvai for Anuvaakam A-15**

(अग्नेर्मन्वे – यस्येद– मिन्द्रस्य – यः सं ग्राममिन्द्र॑ – स नो मुञ्चत्व॑ हसः ।

मन्वे वान्ता नो मुञ्चतमागसः ।

यो वां – वायो– रुप – रथीतमौ – यदयात–मश्विनौ – तौ नो मुञ्चतमागसः ।

मरुतान्– तिग्मं – मरुतो – देवानां – यँदिदं विँश्वान् – ते नो मुञ्चन्त्वेनसः ।

अनु न – उर्वी – द्यावापृथिवी – ते नो मुञ्चतम॑हसो यत्तै ।

चतुर॑हसः षाडागसश्चतुरेनसो द्विर॑हसः ।

**Prasna Korvai with starting Padams of 1 to 15 Anuvaakams :-**

अग्नाविष्णू – ज्यैष्ठय॑ – शञ्चो – क्र्चा – ऽश्मा चा – ग्निश्चा– ऽ॑शु – श्चेद्ध्मश्चा - ग्निश्च घर्मा – गर्भा – श्चैका च – वाजो नो – अग्निं युँनज्मि – ममाऽग्ने – अग्नेर्मन्वे – पञ्चदश ।

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(अग्नाविष्णू – अ॒ग्निश्च॒ – वाजो नो॒ – अदब्धो गो॒पा–नवत्रि॑ꣳशत् )

**First and Last Padam of Seventh Prasnam of Kandam 4:-**

(अग्नाविष्णू – प्र॒तरा॒न्न आयुः )

**Kaanda Korvai with starting Padams of 7 Prasanas of Kandam 4:-**

(युञ्जा॒नो – विष्णो– रपा॒ꣳ॒ – र॒श्मि – र्नमो –ऽश्म॒ –
अग्नाविष्णू – स॒प्त )

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहितायां चतुर्थकाण्डे

पद पाठे सप्तमः प्रश्नः समाप्तः ॥

॥ इति चतुर्थं काण्डं ॥

**Details of Panchati and Padam for Kandam 4, Prasanam 7 (TS 4.7)**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 2 | 118 |
| Anuvakam 2 | 2 | 114 |
| Anuvakam 3 | 2 | 108 |
| Anuvakam 4 | 2 | 114 |
| Anuvakam 5 | 2 | 98 |
| Anuvakam 6 | 2 | 121 |
| Anuvakam 7 | 2 | 84 |
| Anuvakam 8 | 1 | 66 |
| Anuvakam 9 | 1 | 68 |
| Anuvakam 10 | 2 | 90 |
| Anuvakam 11 | 2 | 111 |
| Anuvakam 12 | 3 | 152 |
| Anuvakam 13 | 5 | 237 |
| Anuvakam 14 | 4 | 193 |
| Anuvakam 15 | 7 | 334 |
| Total → | 39 | 2008 |

**Notes:**

1. **Please refer to the book "TS Kandam 1" and "TS 1.1 pada paadam with Vaakyam" for notes and conventions used in this Compilation.**
2. **Please download our vedic compilations from our web site www.vedavms.in**